## अयनं च। (२८/३२९८)

अन्तरदेशे इति वर्तते। अयननकारस्य चान्तःशब्दादुत्तरस्य णकारादेशो भवति अदेशाभिधाने। [1]अन्तरयणं वर्तते। अन्तरयणं शोभनम्। अदेशे इत्येव, अन्तरयनो देशः॥

## छन्दस्यृदवग्रहात्। (२६/३६४८)

पूर्वपदात् इति वर्तते। ऋकारान्तादवग्रहात् पूर्वपदादुत्तरस्य णकारादेशो भवति छन्दसि विषये। 'नृमणाः' (ऋ. १. १६७. ५)। 'पितृयाणम्' (ऋ. १०. २. ७)। अत्र हि [2]नृमणाः, पितृयाणम् इति ऋकारोऽवगृह्यते।

[3]अवग्रहग्रहणं किमर्थमुच्यते, यावता संहिताधिकार आ अध्यायपरिसमाप्तेः (८.२.१०८/३६२७) इत्युक्तम्? विषयोपलक्षणार्थमवग्रहग्रहणम्। अवगृह्यमाणाद् यथा स्यात्, अनवगृह्यमाणात् मा भूत्[4]। अपदान्ते चावग्रहो नास्ति॥

## नश्च धातुस्थोरुषुभ्यः। (२७/३६४९)

नस् इत्येतस्य नकारस्य णकारादेशो भवति धातुस्थान् निमित्तादुत्तरस्य उरुशब्दात् षुशब्दाच्च छन्दसि विषये। धातुस्थात् [5]तावत्–'अग्ने रक्षा णः' (ऋ. ७. १५. १३)। 'शिक्षा णो [6]अस्मिन्' (ऋ. ७. ३२. २६)। उरुशब्दात्–'उरु णस्कृधि' (ऋ. ८.७५.११)। षुशब्दात्–'अभी षु णः सखीनाम्' (ऋ. ४. ३१. ३)। 'ऊर्ध्व ऊ षु ण ऊतये' (ऋ. १. ३६. १३)। अस्मदादेशोऽयं नस्शब्दः 'बहुवचनस्य वस्नसौ' (८. १. २१/४०५) इति॥

## उपसर्गाद्बहुलम्। (२८/८५९)

[7]उपसर्गस्थान् निमित्तात् उत्तरस्य नसो नकारस्य णकारादेशो भवति बहुलम्। प्रणः [8]शूद्रः। प्रणसः। [9]प्रणो राजा। न च भवति। '[10]प्र नो मुञ्चतम्' (ऋ. ६. ७४. ४)। [11]बहुलग्रहणाद् भाषायामपि भवति, प्रणसं मुखम्। [12]'उपसर्गाच्च' (५. ४. ११९/८५८) इति नासिकाया नसादेशः॥

## कृत्यचः। (२९/२८३८)

[13]कृत्स्थः यो नकारः अचः उत्तरः तस्य उपसर्गस्थान् निमित्तादुत्तरस्य णकारादेशो भवति। अन, मान, अनीय, अनि, निष्ठादेश एते णत्वं प्रयोजयन्ति। अन -- प्रयाणम्। परियाणम्। प्रमाणम्। परिमाणम्। मान – प्रयायमाणम्। परियायमाणम्। [14]अनीय -- प्रयाणीयम्। परियाणीयम्। अनि -- अप्रयाणिः। अपरियाणिः। इनि -- प्रयायिणौ। परियायिणौ। निष्ठादेश -- प्रहीणः। परिहीणः। प्रहीणवान्। [15]परिहीणवान्। अचः इति किम्? प्रमग्नः। परिभुग्नः। [16]भुजो कौटिल्ये (धा. पा. १४१८), अस्य निष्ठाप्रत्ययः, 'ओदितश्च' (८. २. ४५/३०१९) इति निष्ठानत्वम्, 'चोः कुः' (८. २. ३०/३७८) इति कुत्वे सिद्धं परिभुग्नः इति।

[९५१] कृत्स्थस्य णत्वे निर्विण्णस्योपसङ्ख्यानं कर्तव्यम्। (म. भा. ३. ४६०)
निर्विण्णोऽस्मि खलसङ्गेन। निर्विण्णोऽहमत्र वासेन॥

---

1. अन्तरयणमन्तरायः इ. 2. नृ अमनाः, पितृ अयानम् इति ड. 3. अवग्रहग्रहणं–विषयोपलक्षणार्थम् नास्ति इ. 4. इति इत्यधिकम् क. 5. तावत् नास्ति ब. 6. अस्मान् ह. 7. नसि इति वर्तते इत्यधिकम् क. इ. 8. रुद्रः ह. 9. प्रनो राया परीणसा (ऋ. 5. 10. 1). 10. प्रनो बन्धुः इ. ह. 11. छन्दसि इति निवृत्तम् इत्यधिकम् क. ह, छन्दसि इत्यत्र निवर्तते इत्यधिकम् इ. 12 उपसर्गाच्च नास्ति ब. ड. 13. उपसर्गात् इति वर्तते इत्यधिकम् क. इ, 14. अनीयर् क. 15. परिहीणवान् नास्ति इ. 16. भुजो–परिभुग्नः इति नास्ति इ.